# मेघदूतखण्डकाव्यस्यौचित्यपरकमध्ययनम्

सागरमणिसुवेदी[1]


## सारवस्तु :

संस्कृतभाषानिबद्धेषु दूतकाव्येषु महाकवेः कालिदासस्य मेघदूताख्यं खण्डकाव्यं प्रसिद्धं विद्यते । मेघः प्रस्तुतकाव्यस्य दूतरुपेण प्रयुक्तोऽस्ति । कुबेरसेवकस्य यक्षस्य सन्देशहरोऽस्ति मेघः । अचेतनमपि मेघं चेत् धर्माशेषेण महाकविना प्रयुक्तो दृश्यतेऽस्मिन् खण्डकाव्ये । खण्डकाव्यमिदं शापहेतुकविप्रलम्भशृङ्गाररसप्रधानमस्ति । खण्डकाव्येऽस्मिन् प्रमुखं रसमुत्कर्षतां नेतुं माधर्युगुणस्य सुप्रयोगो हेतुरस्ति । कथ्यं वस्तुसमधिकं चमत्कारजनकं विधातुमस्मिन् काव्येऽर्थालङ्काराणां स्थानं समुल्लेख्यं दृश्यते । अर्थालङ्कारेष्वपि प्रसिद्धार्थान्तरन्यासालङ्कारोऽस्ति चमत्कारातिशयजनकः काव्येऽस्मिन् । प्रस्तुतऽस्मिन्नध्ययने मेघदूतखण्डकाव्यस्य परिचयपूर्वकं अङ्गिरसप्रयोगौचित्यविवेचनपुरः सरं तद् व्यञ्जकस्य माधुर्यगुणस्यौचित्यविश्लेषणं, अर्थान्तरन्यासालङ्कारौचित्यञ्चाधीत्य सैद्धान्तिकदृशा रसगुणालङ्कारौचित्यातत् काव्यस्यास्य मूल्यं निरुपितमस्ति ।


*शब्दकुञ्जि* : विप्रलम्भशृङ्गारः, माधुर्यः, अर्थान्तरन्यासः, औचित्यम्, व्यञ्जकः, चमत्कारः ।

## विषयपरिचयः

मेघदूतखण्डकाव्यं महाकविना कालिदासेन विरचितमस्ति । संस्कृतनिबद्धेषु दूतकाव्येषु काव्यमेतत् सुप्रसिद्धमस्ति । काव्येऽस्मिन् मेघो दूतरूपेण प्रयुक्तो विद्यते । कुबेरस्य सेवको यक्षः पुरुषपात्रमस्ति । तत्पत्नी च स्त्रीपात्रमस्ति प्रस्तुतकाव्ये । पूर्वोत्तररूपेण काव्यमेतत् भागद्वये विभक्तमस्ति । मानवीकृतो मेघोः सन्देशहरोऽस्ति । रामगिर्याश्रमपदे स्थितेन यक्षेण मेघमाध्यमात् तत्पत्नीं सम्प्रेषितः सन्देशो मुख्यो विषयः ।

उचितस्य भाव औचित्यं. कथ्यते ।[2] उचितमनुचितञ्च सापेक्षं भवति । लोकव्यवहारानुकूलं प्रतिकूलञ्च सापेक्षं भवति । लोकव्यवहारानुकूलं प्रतिकूलञ्च उचितानुचितरूपेण क्रमेण कथितं विद्यते । पौरस्त्यकाव्यशास्त्रे प्रसिद्धस्यौचित्यसम्प्रदायस्य प्रणेता क्षेमेन्द्र अस्ति । औचित्यविचारचर्चानामको ग्रन्थः प्रणीतानेनाचार्येण । रसालङ्कारादीनां काव्यतत्वानां प्रयोगः समुचितरूपेण करणीय काव्यरचनायाम् । भरतमुनेः प्रारब्धोऽयमौचित्यविचारः ।[3] काव्यशास्त्रस्य चिन्तनक्रमेऽसौ विचारः प्रायः सर्वैराचार्यैः स्वीकृत्यौचित्यमनिवार्यरूपेणैवानुपालितो दृश्यते । ध्वनिसिद्धान्तकारस्यानन्दवर्धनस्य मतेऽपि काव्ये कविभिरनुपालनीयम् भवत्यौचित्यम् । गद्यकाव्ये पद्यकाव्ये चानुशासनमस्तिकवीनामौचित्यस्य परिपालनम् ।[4] काव्ये रसाभावदेशकालादिसंयोजने सर्वत्रौचित्यं प्रदर्शयितुमानन्दवर्धनो निर्दिशति ।[5] भरतमुनेः प्रारब्धोऽन्यैराचार्यैः संवर्धितश्चौचित्यविचारः क्षेमेन्द्रेण सूक्ष्मरूपेण स्वग्रन्थे प्रतिपादितः । क्षेमेन्द्रेणौचित्यस्य सप्तविंशतिभेदाः

---

[1] सहप्राध्यापक, पिण्डेश्वरविद्यापीठम्, धरान । Email: *sagarmanisubedi@gmail.com*

[2] क्षेमेन्द्रः औचित्यविचार चर्चा चौखम्बाविद्याभवन, वाराणसी, तृ.सं. १९८२, पृ. ७, का.७

[3] ब्रज मोहन झा, औचित्यविचार चर्चा, इत्यस्य भूमिकायाम्, प. १३

[4] आनन्दवर्धनः, ध्वन्यालोकः (हि.व्या.) विश्वेश्वरः ज्ञानमण्डललिमिटेड, वाराणसी, द्वि.सं.वि.सं. २०२८।पृ. १८६, का. ८

[5] आनन्दवर्धन, तत्रैव, पृ. ३५८, का. ८९

प्रदर्शिताः ।[६] औचित्यभेदाः पञ्चवर्गेषु विभज्याध्येतुं समुचितं भवतीति कथितं दृश्यते ।[७] मीमांसादर्शनानुसारं प्रथमवर्गे पदवाक्यप्रबन्धाः सम्भवन्ति । काव्यशास्त्रानुसारं गुणालङ्काररसाः द्वितीयवर्गे आपतन्ति । व्याकरणशास्त्रानुसारं क्रियाकारकलिङ्गवचनविशेषणोपसर्गनिपातकालास्तृतीयवर्गे स्थापयितुं शक्यन्ते । लोकतन्त्रानुसारं देशकुलव्रतानि चतुर्थवगे समुचितानि भवन्ति । वक्तुः कवेः सम्बद्धो पञ्चमवर्गे तत्वसत्वअभिप्रायस्वभावसारसङ्ग्रहप्रतिभाअवस्थाविचारनामआशिर्वादौचित्यानि समायान्तीति विषयविभागो विहितो दृश्यते ।[८] औचित्यविचारकारेण गुणालङ्काररसानां काव्यतत्वानां अन्येषाञ्च मीमांसाव्याकरणकविकथनव्यवस्थादीनां तत्वानामाधारेण काव्याध्ययने समुचितानुचितप्रयोगस्थानानि निर्दिष्टानि दृश्यन्ते । कालिदासेन रामायणाद् दूतसम्प्रेषणप्रभावः सङ्गृह्य, ब्रह्ववैवर्तपुराणात् कथावस्तुसमादाय विरचित[९] खण्डकाव्यमिदं गुणालङ्काररसौचित्यसिद्धान्तानुसारमधीयते । प्रस्तुतकाव्ये प्रयुक्तो माधुर्यगुणः, अर्थान्तरन्यासालङ्कारप्रयोगस्थितिः, विप्रलम्भशृङ्गाररसाभिव्यक्तिश्चेति प्रामुख्येन विवेच्यन्ते ।

**समस्याकथनम् :**

- मेघदूतखण्डकाव्ये माधुर्यगुणस्थितिः का वर्तते ?
- अर्थान्तरन्यासालङ्कार प्रयोगकारणात् कीदृशी विद्यतेऽर्थ चमत्कृतिः ?
- विप्रलम्भशृङ्गाररसभेदेषु कस्यास्ति परिपाकस्थितिः ? इति समस्या विद्यन्ते ।

**उद्देश्यम् :**

मेघदूतखण्डकाव्ये माधुर्यगुणौचित्यं पर्यालोच्य तस्य स्थाननिर्धारणकरणमस्यैकमुद्देश्यमस्ति । सूक्तिप्रधानस्यार्थान्तरन्यासालङ्कारप्रयोगात् समुत्पन्नमौचित्याध्ययनमपरमस्त्युद्देश्यम् । विप्रलम्भशृङ्गाररसौचित्यपरिशीलनपूर्वकं तद्भेदनिरूपणञ्चास्य उद्देश्यं विद्यते ।

**पूर्वकार्याध्ययनम् :**

क) शृङ्गाररसस्य मेघदूतखण्डकाव्यस्य च वैशिष्ट्यं प्रकाशयन् सीतारामचतुर्वेदी कथयति - सत्स्वप्यनेषु रसेषु शृङ्गाररसो रसराजोऽस्ति । संयोगविप्रलम्भभेदयुतोऽसौ रसः । केवलं संयोगशृङ्गाररसो विप्रलम्भरसेन विना पुष्टिं नायाति । संयोगशृङ्गाररसस्य परीक्षणशाणं विप्रलम्भशृङ्गाररसोऽस्ति । शृङ्गाररसेनाप्लावितं महाकवेः कालिदासस्य काव्येषु मेघदूतखण्डकाव्यमेव ।[१०]

ख) मेघदूतखण्डकाव्यस्य अर्थान्तरन्यासालङ्कारस्य प्रयोगशिल्पं विचारयन् चतुर्वेदी प्रस्तुतकाव्यस्य धूमज्योति....चेतनाचेतनेषु इति पद्ये प्रयुक्त अर्थान्तरन्यासालङ्कारः कालिदासस्य स्वकीयमलङ्कारोऽस्तीति कथयति ।[११]

[६] क्षेमेन्द्रः, तत्रैव, पृ. ८, का.८-१०

[७] मदनमोहनझा, तत्रैव, भूमिकायां, पृ. ४

[८] मदनमोहनझा, तत्रैव, पृ. ४४

[९] शेषराजशर्मा, मेघदूतखण्डकाव्यस्य भूमिकायां, पृ. २४

[१०] कालिदासग्रन्थावली (सं)सीताराम चतुर्वेदी करुणापति त्रिपाठी अन्ये च, अलीगढ भारत, वि.सं. २०१९ तृ.सं. पृ. ७४ )

[११] चतुर्वेदी, पूर्ववत्, पृ. ७४)

ग) मेघदूतखण्डकाव्यस्य विप्रलम्भशृङ्गाररसस्याध्ययनम् विधातुं प्रस्तुतखण्डकाव्ये यक्षनिर्मितस्य चित्रस्याधारेण विहितं विद्यते । तस्मिन् अध्ययने विप्रलम्भशृङ्गाररसस्य कृते मन्दाक्रान्ताछन्दसः प्रयोगोऽपि सहायकहेतुरूपेण विद्यते इति कथितं दृश्यते । शृङ्गाररसः परिपाककुशलेन महाकविना कालिदासेन माधुर्यगुणं प्रयोज्य रसानुकूलां वैदर्भीरीतिं च प्रयुज्य विप्रलम्भशृङ्गाररसः परिपाकं नीतोऽस्तीति च कथितं दृश्यते ।[१२]

घ) पी.के गोडे इति नामकेन समालोचकेन 'महाकविकालिदासकी उपमाओँका मनोवैज्ञानिक अध्ययन' इति शीर्षके हिन्दीभाषायां तत्विषयकं अनुसन्धानं विहितं दृश्यते । महाकवेः कालिदासस्य उपमालङ्कारसंयोजनं शिल्पसौन्दर्यं मनोवैज्ञानिकदृशा अध्ययनं विहितं दृश्यते । अभिज्ञानशाकुन्तलनाटकसम्वद्धे तस्मिन् समीक्षणे अर्थान्तरन्यासालङ्कारसौन्दर्यं नैवाधीतं दृश्यते । तस्मिन् मेघदूतखण्डकाव्यस्यालङ्कारस्य चर्चाऽपि न विहिता । आलङ्कारिकसौन्दर्याध्ययनं मेघदूतखण्डकाव्यस्य करणीयमेवास्तीति विचारस्तस्मिन् लेखे दृश्यते ।[१३]

ङ) मेघदूतखण्डकाव्यस्य समीक्षणसन्दर्भे तस्य काव्यस्योपजीव्यादिसूचनपूर्वकमस्य काव्यिकं महत्वञ्च समुद्घाटितं दृश्यते । प्रेम्णो विप्रयोगजन्यं शिल्पसौन्दर्यं विवेचितमस्ति । स्नेहो वस्तुतश्चेतनधर्मः, काव्येऽचेतनपात्रेऽपि स्नेहातिशयवर्णनं विहितमस्तीति समुल्लिखितमस्ति । पुनः संयोगसम्भावितस्य विप्रयोगस्य वर्णनेऽपि रससौन्दर्याधिक्यमस्मिन् खण्डकाव्ये विद्यते । इत्याशयो तत्र दृश्यते ।[१४]

**पूर्वाध्ययननिष्कर्ष :**

औचित्यं सापेक्षं भवति । एकत्रोचितं वस्तु ह्यपरत्रानुचितमपि कथयितुं शक्यते । मेघदूतखण्डकाव्यं विप्रलम्भशृङ्गाररसः परिपाकयुतं विद्यते इति प्रसिद्धमेव । रसस्य विषये सैद्धान्तिकदृशा औचित्यमर्मानुसारं विश्लेषणे विहितेऽस्मिनध्ययने तस्य खण्डकाव्यस्योपजीव्य कथावस्तु परिशीलनपूर्वकं तस्याध्ययनं विहितमस्ति । रससिद्धान्तानुसारं शृङ्गाररसस्य प्रमुखभेदयोः संयोगविप्रलम्वयोः मध्येऽस्मिन् खण्डकाव्ये विप्रलम्भशृङ्गाररसस्य परिपाकोऽस्ति । विप्रलम्भशृङ्गाररसस्य भेदेष्वपि शापहेतुको विप्रलम्भशृङ्गाररसः प्रस्तुतखण्डकाव्यस्य प्रमुखोऽस्ति । औचित्यसिद्धान्तानुसारं रसौचित्यदृशा रसोऽसौ परिपाकं गतो दृश्यते । रसस्यास्य परिपाकार्थमालम्बनोद्दीपनानुभावादि संयोजनं समुचितं विद्यते । स्नेहभावयुतयोः नायकनायिकयोर्विलम्भावस्थायामेवातिशयं विकसति रतिः । प्रस्तुतखण्डकाव्येऽपि काव्यनायकस्य यक्षस्य मनसि समुत्पन्ना प्रिया गता रतिर्भृशं विकसिता दृश्यते । वर्षैक परिमितस्य प्रवासवासगतस्य यक्षस्य विरहविलपनं तत्पत्नी विषयिन्या रतेः परिपाकरूपेण परिणमितं विलोक्यते । औचित्यसिद्धान्तदृशाऽपि काव्ये रसौचित्यं मुख्यमस्ति । मेघदूतखण्डकाव्ये विप्रलम्भशृङ्गाररसस्यानुभूतिर्समुल्लेख्यास्ति । रसोऽसौ प्रस्तुतखण्डकाव्यस्य प्राणरूपेणैव स्थितो विद्यते । रसौचित्यदृशा रसपरिपाकोऽसौ सफल एव ।

सैद्धान्तिकरूपेण काव्यगुणेषु माधुर्यगुणः शृङ्गाररससम्बद्धोऽस्ति । माधुर्यगुणव्यञ्जकाः वर्णाः शृङ्गाररसस्यानुकूला भवन्ति । विप्रलम्भशृङ्गाररसस्य परिपाकार्थं माधुर्यगुणस्य प्रयोगः प्रस्तुतकाव्ये समुचित एव दृश्यते । रसपरिपाकेनसह श्रुतिमाधुर्यमाधातुञ्च माधुर्यगुणः समर्थो दृश्यते । गुणस्यास्य कारणेन काव्यसौन्दर्यमत्यधिकं जातं दरीदृश्यते । मेघदूतखण्डकाव्यस्य विप्रलम्भशृङ्गाररसो माधुर्यगुणस्य सुसंयोजने नैव

[१२] सागरमणि सुवेदी, प्रभा २०७४, पिण्डेश्वर विद्यापीठ, धरान वर्ष : २५, अङ्क : १५, पृ.१३३)

[१३] कालिदास ग्रन्थावली, पृ. १०७-११९

[१४] रमाशंकर तिवारी, महाकविकालिदासः, चौखम्बा विद्याभवन, वाराणसी, तृ.सं. वि.सं. २०२९, पृ. १४४

परिपक्वं गत इति निस्संकोचं वक्तुं शक्यते । काव्ये गुणौचित्यदृशा च प्रस्तुतखण्डकाव्ये गुणरसयोः संयोजनमतीवसमीचीनं प्रतिभाति ।

अर्थालङ्कारेष्वर्थान्तरान्यासालङ्कारः सुप्रसिद्धः । सूक्तिमयालङ्काररूपेणास्यालङ्कारस्य परिचयः प्राप्यते । अलङ्कारोऽसौ महाकवेः कालिदासस्य प्रियष्वलङ्कारेषु च परिगणितोऽस्ति । मेघदूतखण्डकाव्यस्य काव्यसौन्दर्यं चमत्कारातिशयञ्चाभिवर्धयितुमलङ्कारस्यास्य स्थानं समुल्लेख्यं विद्यते । सामान्यमर्थं समर्थयितुं विशेषार्थेन विशेषमर्थं समर्थयितुं सामान्यार्थकथनेन चास्यालङ्कारस्य वैशिष्ट्यं स्थापितं सिद्धञ्च दृश्यते । सूत्रात्मकं सुन्दरं सूक्तिमयं सहृदयहृदयाह्लादजनकं कथनमलङ्कारस्यास्य प्राणभूतं तत्वं दृश्यते । स्वल्पेनापि कथनचातुर्येणार्थमाधुर्येणास्यालङ्कारस्य पृथकत्वं सुरक्षितं विलोक्यतेऽलङ्कारशास्त्रे । काव्येऽलङ्कारसंयोजननिपूणेन महाकविना कालिदासेन मेघदूतखण्डकाव्येऽर्थान्तरन्यासालङ्कारप्रयोगः स्वाभाविकरूपेण विहितो दृश्यते । महाकवेः परिचयोऽसौ प्रस्तुतेऽस्मिन् खण्डकाव्ये स्पष्टं दृश्यते । अलङ्कारौचित्यदृशा चास्यालङ्कारस्य प्रयोगो विलोक्यते समुचितः । अर्थान्तरन्यासालङ्कारः सुप्रयोगकारणेनास्मिन् खण्डकाव्ये विप्रलम्भशृङ्गाररसस्योत्कर्षत्वञ्च विभाति । रसानुभूतये सूक्तिमयेन कथनजन्यार्थचमत्कारेण च भूमिका विहितास्ति । औचित्यसिद्धान्तदृशा अर्थान्तरन्यासालङ्कारप्रयोगौचित्यं मेघदूतखण्डकाव्ये सुदृढं विलोक्यते ।

मेघदूतखण्डकाव्यस्य चमत्कारातिशयं यद् विद्यते तस्य हेतू रूपेण अर्थान्तरन्यासालङ्कारप्रयोगौचित्यं, माधुर्यगुणौचित्यञ्च स्थितौ दृश्येते । विप्रलम्भशृङ्गाररसौचित्यं तु प्रस्तुतखण्डकाव्यस्य प्राण एवास्ति । एतन्महत्वं सदपि विप्रलम्भशृङ्गाररसौचित्यं, माधुर्यगुणौचित्यं अर्थान्तरन्यासालङ्कारौचित्यञ्च मेघदूतखण्डकाव्यस्य एकत्र अध्ययनं न विहितमस्ति । अवशिष्टरूपेण स्थितोऽसौ विषयः प्रस्तुतशीर्षके अध्ययनविषयत्वेन स्वीकृतोऽस्ति ।

**अध्ययनविधिः**

प्रस्तुतान्युद्देश्यानि परिपूरणार्थं पुस्तकालयं प्रयुज्याध्ययनकार्यं सम्यक् सम्पादयितुं लक्षणलक्ष्यसङ्गतिप्रदर्शनपूर्वकमागमननिगमनविश्लेषणविधिश्चोपयुज्यते ।

**सीमाङ्कनम् :**

मेघदूतखडकव्यस्य विप्रलम्भशृङ्गाररसस्य, माधुर्यगुणस्यार्थान्तरन्यासालङ्कारस्य च काव्यौचित्यदृशा, समीक्षणस्याध्ययनस्य सीमाङ्कनमस्ति ।

**सैद्धान्तिकाधारः**

पौरस्त्यकाव्यसम्प्रदायेषु सर्वसम्प्रदायानां समन्वयवादीसिद्धान्तरूपेण सिद्धान्तोऽसौ परिचित औचित्यसिद्धान्तः । तस्य सिद्धान्तस्यानुशीलनपूर्वकमस्य लक्षणलक्ष्यसङ्गतिरन्वेषणमप्यस्याध्ययनस्य प्रमुखः सैद्धान्तिकाधार अस्ति । औचित्यसिद्धान्तमतमधीत्य प्रस्तुताध्ययने निर्दिष्टान् प्रमुखोद्देश्यान् परिपूरयितुं पूर्वं विप्रलम्भशृङ्गाररसस्य परिचयपूर्वकं तस्य प्रयोगः प्रस्तुतखण्डकाव्ये कीदृशोऽस्ति, माधुर्यगुणस्य कः परिचयः, काव्ये रसपरिपाके तस्य गुणस्य भूमिका कीदृशी विद्यते ? अर्थान्तरन्यासालङ्कारस्य सैद्धान्तिकं स्वरूपं किमस्ति ? तस्य काव्यचमत्कारं कीदृशं विद्यते ? इति च यथाशास्त्रमध्ययनं विधाय तेषां स्वरूपञ्च प्रदर्श्य मेघदूतखण्डकाव्ये विप्रलम्भशृङ्गाररसस्य माधुर्यगुणस्य अर्थान्तरन्यासालङ्कारस्य च प्रयोगस्थितिं प्रदर्श्यते । मेघदूतस्य वैशिष्ट्यमभिवर्द्धयितुं विप्रलम्भशृङ्गाररसौचित्यं, माधुर्यगुणौचित्यं, अर्थान्तरन्यासालङ्कारौचित्यञ्च यथाशास्त्रं

विविच्य निष्कर्षनिरूपणं विधीयते । रससिद्धान्तः, अलङ्कारसिद्धान्तः, गुणसिद्धान्तः, औचित्यसिद्धान्तश्च प्रस्तुताध्ययनस्याधाररूपेण गृहीता सन्ति ।

**विषयप्रवेशः**

गुणा रसधर्माः । काव्येऽङ्गिनं रसम् ये अवलम्बन्ते, ते गुणाः कथिताः ।[१५] आत्मनः शौर्यादय इव काव्यस्योत्कर्षधायका सम्भवन्ति गुणा इति मम्मट कथयति ।[१६] काव्येऽङ्गिरसस्य धर्मा गुणा सम्भवन्तीति कथयन् विश्वनाथस्त्रयोगुणाः स्वीकरोति ।[१७] माधुर्य ओजप्रसादाख्यागुणाः प्रसिद्धाः ।[१८]

**काव्ये गुणस्य महत्त्वम् :**

काव्येऽङ्गिरसं परिपोषयन्ति गुणाः । रसंसमुत्कर्षं नयन्ति च ते । काव्यस्य प्रमुखरसस्य परिपाकंयावत् प्रापणं गुणस्य कार्यं, तन्महत्वञ्चास्ति ।

माधुर्यगुणः- नाम्नैव मधुरोऽयं गुणः । सामाजिकचित्तद्रुतिकरोऽसौ गुणः क्रमशः सम्भोगश्रृङ्गाररसे, करुणरसे, विप्रलम्भशृङ्गाररसे, शान्तरसेचात्यन्तं चित्तद्रुतिकरो भवति ।[१९] विश्वनाथेनापि माधुर्यगुणमाह्लादजनकः चित्तद्रवीभावमयश्च भवतीति कथितः ।[२०] श्रृङ्गाररसे गुणोऽसौ प्रह्लादनकरो भवतीति आनन्दवर्धनेन कथितः ।[२१] असमासा, अल्पसमासा वा मधुरा रचना गुणस्यास्योपयोगिनी भवति ।

काव्ये गुणौचित्यविचारयता क्षेमेन्द्रेण प्रस्तुतार्थोचितो गुणः काव्ये भव्यः सौभाग्यवांश्च भवतीति कथितो दृश्यते ।

प्रस्तुतार्थोचितः काव्ये भव्यः सौभाग्यवान्गुणः ।

स्यन्दतीन्दुरिवानन्दं संभोगावसरोदितः[२२]

शब्दार्थमयस्य काव्यशरीरस्य शोभाधायकाः अलङ्काराः ।[२३] सुन्दरमपि वनितामुखमाभूषणं विना नशोभत इति कथयति भामहः ।[२४] उष्णत्वेन विना यथाग्निर्नभवति, तथैवालङ्कारेण विनापि काव्यं नभवतीति कथयति जयदेवः ।[२५] काव्यप्रकाशकारेण काव्येऽलङ्कारा ऐच्छिकधर्मा स्वीकृताः ।[२६] विश्वनाथेनापि काव्यस्यास्थिरा धर्मा

[१५] ध्वन्यालोकः, पृ. ९४, कारिका ६

[१६] मम्मटः, काव्यप्रकाशः, (व्या. आचार्य विश्वेश्वरः) चौखम्बा संस्कृत भवन, ज्ञानमण्डल लि. वाराणसी, ष.सं.. वि.सं. २०४२, सू. ८६, कारिका ६६, पृ. ३८०)

[१७] विश्वनाथः साहित्यदर्पणः, (तर्कवागीश टीकायुतः) चौखम्बा विद्याभवन, वाराणसी द्वि.सं. सन् १९९८, पृ. ४२३, ४२४, का. १-१२,

[१८] विश्वनाथ, तत्रैव

[१९] मम्मट, तत्रैव सू. ९०, पृ. ३८८

[२०] विश्वनाथः, सा.द., पृ. ४२४-४२६, का. २)

[२१] आनन्दवर्धनः, तत्रैव, पृ. ९५, का. ७

[२२] क्षेमेन्द्रः, तत्रैव, पृ. २८, कारिका १४

[२३] वामनः, का.सू. १.१.२

[२४] भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत संस्थान वाराणसी, द्वि.सं. संवत् २०३८, १, १३ कारिका

[२५] जयदेवः, चन्द्रालोकः चौखम्बा संस्कृत सिरिज अफिस बनारस सिटि, का. १,८

[२६] काव्यप्रकाशः, सूत्रम् ८७, पृ. ३८१

अलङ्कारा काव्यसौन्दर्यकराः सम्भवन्तीति कथितः ।[२७] वस्तुतः कटककुण्डलादिवदेवालङ्कारा काव्यस्योत्कर्षधायकाः सम्भवन्ति । अलङ्कारशास्त्रे परिगणितेष्वर्थालङ्कारप्रकारेष्वर्थान्तरन्यासालङ्कारः समर्थ्यसमर्थकार्थजन्योऽस्ति । विशेषार्थः सामान्यार्थेन, सामान्योऽर्थो विशेषार्थेन यत्र समर्थ्यते, तत्रार्थान्तरन्यासालङ्कारो जायते ।

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः[२८]

सूक्तिमयेनार्थसमर्थकेनोक्तालङ्कारेण कथ्यवस्तुनश्चमत्कारातिशयं प्रकाश्यते ।

काव्येऽलङ्कारस्योचितप्रयोगेण काव्यार्थोऽधिकं समुत्कर्षतां यातीति क्षेमेन्द्रस्य कथनं विद्यते ।

अर्थौचित्यवता सूक्तिरलङ्कारेण शोभते ।

पीनस्तनस्थितेनेव हारेण हरिणेक्षणा ।[२९]

काव्ये प्रयुक्तोऽलङ्कारः सूक्तिमयः स्यात् । तेनालङ्कारेण युवत्या वक्षस्थलस्थितेन हारेण इव काव्यार्थः शोभते ।

**३) रसौचित्यम् :**

रस्यते आस्वाद्यते इति रसः । आनन्दापरपर्यायो रसश्चित्तवृत्तिस्थितानां रतिहासादीनां स्थायिभावानामास्वाद्यरूपोऽस्ति । श्रृङ्गारादयो रसाः प्रसिद्धा एव । रसराजस्य शृङ्गारस्य परिचयक्रमे भरतमुनिः कथयति-

श्रृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।

उत्तमप्रकृतिप्रायोः रसः श्रृङ्गार इष्यते ।[३०]

श्रृङ्गाररसः कामोत्पत्तिकारकोऽस्ति । सम्भोग विप्रलम्भभेदेन रसोऽसौ प्रमुखतया द्विविधः । यत्र तु रतिविप्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ ।[३१] विप्रलम्भशृङ्गाररसः पूर्वरागमानप्रवासकरुणहेतुत्वेन विश्वनाथेन चतुर्विधः स्वीकृतः ।[३२] मम्मटेन तु अभिलाषविरहईर्ष्याप्रवासशापहेतुरूपाद् रसोऽयं पञ्चविधः कथितः ।[३३] काव्ये रसौचित्यं विवेचयता क्षेमेन्द्रेण काव्ये समुचितरूपेण प्रयुक्तः श्रृङ्गारादिको रस मधुमासस्याशोक इव सहृदयचित्तवृत्तिमङ्कुरितं कारयतीति कथितः । तत्कथनं यथा -

कुर्वन्सर्वाशये व्याप्तिमौचित्यरुचिरो रसः ।

मधुमास इवाशोकं करोत्यङ्कुरितं मन : ।[३४]

औचित्यविचारकारेण समुल्लिखितानां काव्यतत्वानां गुणालङ्काररसानां मध्ये मेघदूतखण्डकाव्ये प्रयुक्तस्य माधुर्यगुणस्य, अर्थान्तरन्यासालङ्कारस्य, विप्रलम्भश्रृङ्गारप्रयोगौचित्यस्याध्ययनं विधीयते ।

---

[२७] साहित्यदर्पणः, ९,१, प. ४४४

[२८] अप्पयदीक्षितः कुवलयानन्दः चौखम्बा विद्याभवन, बनारस, चतुर्थ सं. १९९७, लक्षणं १२२, पृ. २०१

[२९] क्षेमेन्द्रः, १५, पृ. ३४

[३०] भरतमुनिः, नाट्यशास्त्रम् पृ. ७

[३१] विश्वनाथः, पृ. १६२

[३२] विश्वनाथः, कारिका १८७, पृ. १६२

[३३] मम्मट, पृ. १२३

[३४] क्षेमेन्द्रः, १६, पृ. ४१

मेघदूतखण्डकाव्यं भागद्वययुतं विद्यते । काव्यस्यास्य नायको यक्ष अस्ति । नायिका चास्य पत्नी विद्यते । नायकोऽसौ कुबेरस्य सेवकोऽस्ति । कुबेरस्य शापात् तन्नगरात् बहिर्गत्वा पत्नीविप्रयुक्तः सन् वर्षमेकं यावत् एकाकी एव स्थितोऽसौ । रामगिर्याश्रमेषु तिष्ठनष्टौ मासान् यापयित्वा पत्नीं स्मारं तामेव मनसि निधाय सन्देशं सम्प्रेषयति । प्रस्तुतकाव्यस्य दूतो मेघोऽस्ति ।

काव्येऽस्मिन् विप्रलम्भशृङ्गाररसः प्रमुखोऽस्ति । विप्रलम्भशृङ्गाररसभेदेषु शापहेतुकोऽसो रसः । नायकनायिकेऽस्यालम्बनविभावः स्तः । नायकनायिकयोर्मनसि जागृता रतिः स्थायिभावः । यक्षस्य विरहाकुलत्वाश्रुपातादयोऽनुभावाः सन्ति । पूर्वस्मृतिः[३५] मेघोदयादिर्शनम्[३६] उद्दीपनविभावोऽस्ति । ग्लानि चिन्तावितर्कादयः सञ्चारिभावाः सन्ति । पत्नीं संस्मृत्य यक्षस्य मनसि विकसिता, भोगाद् वञ्चिता च रतिर्विप्रलम्भशृङ्गाररसरूपे परिणमिता, अनुभूति विषयगता चास्ति ।

सन्देशं नेतुमचेतनो मेघो न शक्नोति । इत्थं ज्ञात्वापि कामपीडितो यक्षः सन्देशमाहर्तुं तं याचते ।[३७] सम्भोगसुखाद् वियुक्तो यक्षः पूर्वानुभूतं तत्सुखमनुभूयमानोऽस्ति । यक्षपत्न्यपि विरहमनुभवन्ती एकाकिनी तिष्ठति । सापि रतिसुखं संस्मृत्यास्ते, मदभावे, इति विचारयति विप्रयुक्तो यक्षः ।[३८] स्वपत्युरभावे यक्षपत्न्यपि रात्रौ न शेते । विरहाश्रुभरिते तन्नेत्रे यक्षं प्रतीक्षेते । मेघाच्छादितास्थलकमलिनीव सा यथास्थितिं यापयन्ती स्थितेति यक्षः कथयति ।

पादानिन्दोरमृतशिशिराञ्जालमार्ग प्रविष्टान् ।

पूर्वप्रीत्यागतमभिमुखं संनिवृत्तं तथैव ॥

चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं ।

साभ्रेऽन्हीवस्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥[३९]

पतिविप्रयुक्ता, दीर्घकालंयावत् एकाकिनी स्थिता पत्नी स्वाभाविकरूपेण दुर्बला जाता । आभूषणादिभिरहिता सा निश्चयेन कृशशरीरा विद्यते । शयनस्थाने स्थितां तादृशीं मत्प्रियां विलोक्य त्वमपि अश्रुविन्दून् मोचयिष्यति । मेघंप्रति तत्कारणं कथयति यक्षः पुनः करुणार्द्रहृदयो जनः प्रायो दुःखेषु दयाभरितो भवति ।

सा संन्यस्ताभरणमबला पेशलं धारयन्ती

शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।

त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यम्

प्रायः सर्वोभवति करुणावृत्तिराद्रान्तरात्मा ॥[४०]

रतिरागान्वितो यक्षः पत्नीविप्रयुक्तः सन् विहितपूर्वं सम्भोगं, तत्सुखञ्च स्मरति । तत्स्मरणेनापि कामाशक्तः स स्मृतिविषयीभूतमानन्दं मेघंप्रति कथयति ।[४१] शापवशात् प्रवासगतो यक्षः विरहिणी यक्षपत्नी कृशशरीरा विद्यते ।

---

[३५] ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः प्र.मे. ४१। पृ. ९०

[३६] मेघालोके भवति सुखिनोप्यन्यथावृत्तिचेतः । पू.मे. ३, पृ. ९

[३७] धूमः ..........कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु, पू.मे. ५, पृ. १३

[३८] पू.मे. २६, पृ. १९३

[३९] उत्तरमेघम् २७, पृ. १९५

[४०] उत्तरमेघम् ३०, पृ. २०१

[४१] उत्तरमेघम् ३३, पृ. २०८

अविच्छिन्नाश्रुधारा प्रवहणशीला सा सन्तप्ता चास्ति । यक्षश्च प्रस्तुतैर्विरहलक्षणैः शासितोऽस्ति । समाना स्थिति अतः कायेन, मनसाचाहं त्वयि प्रविशामीति यक्षः कथयति ।

अङ्गेनाङ्गं प्रतनुतनुना गाढतप्तेन तप्तं,
सास्त्रेणास्त्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ॥
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती ।
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥[४२]

यक्षपत्नी सुन्दरी वर्तते । यक्षस्तत्सौन्दर्यं स्मरति । तस्याः शरीरसौन्दर्यं प्रत्यक्षमवलोकयितुमिदानीं न शक्नोति स । तस्याः सौन्दर्यं नेत्राभ्यां पातुं, मनसाऽऽस्वादयितुञ्चातुरो यक्षः प्राकृतिकसौन्दर्ये तत्सम्भावयति ।

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं,
वक्त्रच्छायां शशिनि, शिखिनां बर्हभारेषु केशान् ॥
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन्क्वचिदपि न ते चण्डि ! सादृश्यमस्ति ॥[४३]

स्वपत्नीशरीरेऽवयवे विन्यस्तसौन्दर्यं त्वत्शरीरे द्रष्टुं शक्यते । प्राकृतिकसौन्दर्ये तु एकैकस्थानेषु तवावयवसौन्दर्यं प्राप्यते, परमेकत्र नैव तत् सर्वं शारीरिकं सौन्दर्यमस्ति । दैववशाद् दूरस्थोऽहं त्वत्सौन्दर्यसादृश्यं दिदृक्षापि पीडितोऽस्मीति कथयति । एतत् कथनेऽपि यक्षस्याभीष्टा न दृश्यते । प्रियावियुक्तो यक्षः शिलायां तस्याश्चित्रं निर्माय सौन्दर्यानुभूतिं कर्तुमिच्छति । चित्रेण सहात्मानमपि एकीकर्तुञ्चेच्छति । तत्कर्मण्यपि मेघसमक्ष स्वपीडामनेनप्रकारेण प्रस्तौति स -

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितुं यावदिच्छामि कर्तुम् ।
अश्रैस्तावन्मुहुरूपचितैदृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।[४४]

शारीरिकरूपेण विप्रयुक्तो यक्षो रतिरागयुतोऽपि प्रियायाः अभावे पीडितोऽस्ति । स स्नेहयुतः कामातुरः सौन्दर्याभिलाषी च विद्यते । एकपतिव्रता यक्षपत्नी च पतिवियोगात् पीडिता दृश्यते तत्कथनात् । नायकनायिकागतारतिः साधारणीकरणव्यापारबलात् सहृदयैरनुभूयते विप्रलम्भशृङ्गाररसपरिपाकरूपे ।

काव्यगुणेषु माधुर्यगुणः श्रृङ्गाररसाभिव्यञ्जकोऽस्ति । गुणोऽयं मधुरवर्णाभिव्यक्तो भवति । रचना च असमासा अल्पसमासा स्वीकृता । प्रस्तुतकाव्ये परिपाकावस्थां सम्प्राप्तस्य विप्रलम्भश्रृङ्गाररसस्याभिव्यक्तौ गुणोऽयं सुप्रयुक्तो दृश्यते ।

सन्देशमानीय कान्तासमीपं गम्यमानं मेघं मार्गं निर्दिशन् कथयति यक्षः

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नयति मधुरं चातकस्ते स गन्धः ।

---

[४२] उत्तरमेघम् ३९, पृ. २२२

[४३] उत्तरमेघम् ४१, पृ. २२६

[४४] उत्तरमेघम् ४२, पृ. २२९

गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः

सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।[४५]

मेघं प्रसन्नं विधाय स्वसन्देशं प्रेषयितुं कुशलोऽस्ति यक्षः । मेघंप्रति तत्कथनमपि मधुरं दृश्यते । प्रस्तुतपद्ये प्रयुक्ता वर्णाः माधुर्यगुणोपयोगिनः सन्ति । रचना च समासयुता नास्ति ।

यक्षः प्रियाया दशामनुभूय, मेघस्य स्वभावञ्च विज्ञाय तत्र कृत्यमुपदिशति ।[४६]

प्रस्तुतपद्येऽस्ति माधुर्यगुणः । वर्णप्रयोगाद् रचनादृशा च सन्यस्तोऽयं गुणो विप्रलम्भशृङ्गाररसाभिव्यक्तौ सुप्रयुक्तो दृश्यते ।

प्रस्तुतकाव्ये माधुर्यगुणस्याधिक्यमस्ति । गुणस्यस्याभावस्थाने प्रसादगुणोऽस्ति । सर्वेषु रसेषु प्रसादगुणोऽस्ति स्वीकृतः । अनेन गुणेनापि काव्यस्यास्याङ्गिरसोऽस्ति परिपाकावस्थां गतः । समासादयः कठोरवर्णजन्य ओजोगुणो न दृश्यते । तस्माद् विप्रलम्भशृङ्गाररसस्य परिपाकस्योपयोगिनो माधुर्यगुणस्य प्रयोजनं स्पष्टं द्रष्टुं शक्यते ।

महाकवेः कालिदासस्य प्रियालङ्कारेष्वर्थान्तरन्यासालङ्कारोऽपि परिगणितः । कथ्यकाव्यस्यार्थपरिपुष्टार्थं सूक्तिमयस्यास्यालङ्कारप्रयोगकारणात् मेघदूतखण्डकाव्यं हृद्यं जातं विद्यते । पद्येषूपरिकथितमर्थं स्वाभाविकरूपेण समर्थयितुमस्यालङ्कारस्य प्रयोगो विहितो दृश्यते ।

धूमज्योतिसलिल मरुतां सन्निपातः क्व मेघ ?

सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।

इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे

कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥[४७]

आषाढस्य प्रथमदिवसे नवोदितं मेघं विलोक्य तमेव सन्देशदूतं परिकल्प्य प्रियायै सन्देशवचनानि प्रेषयितुमिच्छति यक्षः । मेघोऽचेतनोऽस्ति । सन्देशश्चेतनग्राह्योऽस्ति । सन्देशार्थमयोग्योमेघो तेन कथं गृहीतः ?

वस्तुतो यक्षः कामपीडितोऽस्ति । कामातुरात् स विवेकहीनश्चास्ति । अत एव चेतनाचेतनविषयविभागं कर्तुमपि स क्षमो न इति पद्यस्यास्य चतुर्थ पादगतं-

कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

इति कथनमुपरिकथितमर्थं समर्थयति । तत्समर्थनात् अलङ्कारोऽसौ निर्मितः । असङ्गमपि कथनमनेनालङ्कारेण सङ्गतियुतः यथार्थपरकञ्च जातमस्ति ।

जातं वंशे भुवनविदिते पुष्करावर्तकानां

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।

तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं

याच्ञा मोघा वरमधिगुणे नाधमेलब्धकामाः ॥[४८]

---

[४५] उत्तरमेघम् ९, पृ. २२

[४६] उत्तरमेघम् ३०, पृ. २०१

[४७] पूर्वमेघम् ५, पृ. १३

[४८] पूर्वमेघम् ६, पृ. १६

यक्षो मेघस्य जन्मवंशविषये सूक्ष्मरूपेण जानाति । उच्चकुलोत्पन्नोऽस्ति मेघः । यक्षो मेघं दूतरूपेण सम्प्रेषयन्नस्ति । दूतकार्ये नियुक्तिकारणं कथयति- अधमात् लब्धकामात् उत्तमेनिष्फलायाचना श्रेष्ठतरा भवति । प्रस्तुतपद्यस्य पूर्वकथनं चतुर्थपादगतकथनेन समर्थितोऽस्ति । अत एवास्मिन् कथनेऽर्थान्तरन्यासालङ्कारोऽस्ति ।

विरहाकुलायक्षपत्नी दुर्बला, अलङ्कारहीना चास्ति । रुदन्तीं तां विलोक्य त्वमपि नूतनजलरूपमश्रुविन्दून् मोचयिष्यतीति कथयति यक्षः -

सा सन्यस्तामरणमबला पेशलं धारयन्ती

शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।

त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यं

प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥[४९]

प्रस्तुतपद्ये मेघस्य जलरूपमश्रुपतनस्य कारणं चतुर्थचरणस्थं कथनं स्पष्टं करोति । अपरस्य दुःखं दृष्ट्वा कोमलचित्तवृत्तियुतोजनोऽपि दुःखाकुलो जायते । पूर्वकथनमुत्तरवाक्यार्थेन समर्थितोऽस्ति । अत अर्थान्तरन्यासालङ्कारोऽस्ति ।

निःशब्दः सन् मेघश्चातकेभ्यो जलं ददाति । यक्षविलपनं श्रुत्वाऽपि मेघः किमपि न कथयति । एतद् विलोक्य यक्षः सम्भावयति यत् -

कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे ।

प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।

निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः

प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥[५०]

मेघो यक्षवचनं केवलं श्रृणोत्येव । अयं मां वचनदानात् नाश्वासयति । सज्जनाः याचकानामिच्छां क्रियैव पूरयन्तीति मेघचरितं विलोक्य चतुर्थचरणे तत्समर्थयति यक्षः । अत एवास्मिन् पद्येऽर्थान्तरन्यासालङ्कारोऽस्ति ।

महाकविःकालिदासः स्वकाव्येषु स्वाभाविकरूपेणार्थचमत्कारजनकानामलङ्काराणां संयोजनं कर्तुं कुशलोऽस्ति । प्रस्तुतकाव्येऽपि कालिदासेनार्थोत्कर्षधायकानामन्येषामप्यलङ्काराणां प्रयोगो विहितः । तेष्वलङ्कारेष्वर्थान्तरन्यासालङ्कारप्रयोगोऽस्ति हृदयाह्लादजनकः । अर्थान्तरन्यासालङ्कासंयोजनादस्मिन् काव्ये विप्रलम्भशृङ्गाररसस्याभिव्यक्तिरस्ति नितरां सहृदयहृदयहारि । प्रासङ्गिकमर्थं समुत्कर्षयितुं, तत् स्पष्टीकर्तुञ्चायमलङ्कारो सुप्रयुक्तो दृश्यते ।

विप्रलम्भश्रृङ्गाररसपरिपोषकस्य माधुर्यगुणस्य प्रयोगेऽपि मेघदूतं हृद्यं दृश्यते । प्रस्तुतगुणाभिव्यञ्जकानां वर्णानां संयोजनात् तदनुकूलाया रचनाया विनिर्माणाच्च काव्यमिदं सार्थकं गुणयुतं जातं विद्यते । विप्रलम्भशृङ्गाररसभेदेषु शापहेतुकश्रृङ्गाररसः परिपाकावस्थां गतोऽस्ति । रसोऽयं प्रस्तुतकाव्यस्याङ्गिरसोऽस्ति ।

काव्यौचित्यप्रविभागे स्थापितानां रसगुणालङ्काराणामाधारे प्रस्तुतकाव्यस्य विप्रलम्भशृङ्गाररसस्य माधुर्यगुणस्यार्थान्तरान्यासालङ्कारस्यौचित्यमत्र विवेचितम् । काव्यौचित्यदृशा काव्यस्य प्राणभूतस्य रसस्यौचित्यपरिपालने काव्यमिदमौचित्यपूर्णं दृश्यते । काव्यस्याङ्गिरसस्योत्कर्षतायै माधुर्यगुणप्रयोगोऽपि समुचित

---

[४९] उत्तरमेघम् ३०, पृ. २०१

[५०] उत्तरमेघम् ५१, पृ. २४९

एव विलोक्यते । गभीरार्थमूलस्य, सूक्तिप्रधानस्यार्थान्तरन्यासालङ्कार प्रयोगौचित्यदृशा च काव्यमिदमौचित्यपूर्णं विद्यते ।

**अध्ययननिष्कर्षः**

मेघदूतखण्डकाव्यं संस्कृतसाहित्यस्य दूतकाव्येषु प्रसिद्धमस्ति । अस्य काव्यस्य महत्वं रसपरिपाकस्य कारणात् स्थापितं दृश्यते । विप्रयुक्तस्य काव्यनायकस्य पीडां प्रस्तोतुं विप्रलम्भशृङ्गाररसस्य यः प्रयोगो विहितः, सः सहृदयहृदयहारि, औचित्यसिद्धान्तदृशा च समुचितो विद्यते । विप्रयोगस्य हेतुरस्ति शापः । विप्रलम्भशृङ्गाररसभेदेषु काव्येऽस्मिन् शापहेतुक शृङ्गाररसः प्रमुखो दृश्यते । रसस्यास्य परिपाककारणादेव काव्यस्यास्य महत्वं जातमस्ति । रसाभिव्यञ्जकेषु काव्यगुणेषु माधुर्यगुण प्रयोगश्चास्य काव्यस्योत्कर्षहेतुर्दृश्यते । गुणोऽयं नाम्नैव मधुरः, विप्रलम्भशृङ्गाररसश्च सुकोमल एवस्ति । अनयोर्गुणरसयोः सामञ्जस्यमस्य काव्यस्यौचित्यमूल्यं प्रदर्शयति । खण्डकाव्येऽस्मिन् प्रयुक्तेष्वर्थालङ्कारेष्वर्थान्तरन्यासालङ्कारोऽस्ति प्रमुखः । अस्तालङ्कारस्य कारणाच्च रसपरिपाको जातो विलोक्यते । सैद्धान्तिकदृशाखण्डकाव्यमिदं रसगुणालङ्कारौचित्यपूर्णं दृश्यते ।

**सन्दर्भग्रन्थसूची :**


अप्पयदीक्षितः *कुवलयानन्दः* चौखम्बा विद्याभवन, बनारस, चतुर्थ सं. १९९७ व्रज मोहन झा, औचित्यविचार चर्चा, इत्यस्य भूमिकायाम्

आनन्दवर्धनः, *ध्वन्यालोकः* (हि.व्या.) विश्वेश्वरः ज्ञानमण्डललिमिटेड, वाराणसी, द्वि.सं.वि.सं. २०२८

क्षेमेन्द्रः *औचित्यविचार चर्चा*, चौखम्बाविद्याभवन, वाराणसी, तृ.सं. १९८२

कालिदासग्रन्थावली (सं) सीताराम चतुर्वेदी करुणापति त्रिपाठी अन्ये च, अलीगढ भारत, वि.सं. २०१९

कालिदास, *मेघदूत*, व्या.शेषराज रेग्मी, चौखम्बा विद्याभवन, वाराणसी, दशम सं. १९९२ ।

*ध्वन्यालोक*

जयदेवः, *चन्द्रालोकः* चौखम्बा संस्कृत सिरिज अफिस बनारस सिटि

भामहः, *काव्यालङ्कारः*, चौखम्बा संस्कृत संस्थान वाराणसी, द्वि.सं. संवत् २०३८

मम्मटः, *काव्यप्रकाशः*, (व्या. आचार्य विश्वेश्वरः) चौखम्बा संस्कृत भवन, ज्ञानमण्डल लि. वाराणसी, ष.सं.. वि.सं. २०४२)

रमाशंकर तिवारी, *महाकविकालिदासः*, चौखम्बा विद्याभवन, वाराणसी, तृ.सं. वि.सं. २०२९

वामनः, *का.सू.*

विश्वनाथः *साहित्यदर्पणः*, (तर्कवागीश टीकायुतः) चौखम्बा विद्याभवन, वाराणसी द्वि.सं. सन् १९९८

सागरमणि सुवेदी, *प्रभा २०७४*, पिण्डेश्वर विद्यापीठ, धरान वर्ष : २५, अङ्क : १५